✧˖°*❋ ❋*°˖✧

# श्री जानकी स्रोत्र – जानकि त्वां नमस्यामि
# (Janaki Sotra – Janki Twam Namasyami)

✧˖°*❋ ❋*°˖✧

# श्री जानकी स्रोत्र

जानकि त्वां नमस्यामि सर्वपापप्रणाशिनीम्
जानकि त्वां नमस्यामि सर्वपापप्रणाशिनीम् ॥१॥

दारिद्र्यरणसंहर्त्रीं भक्तानाभिष्टदायिनीम् ।
विदेहराजतनयां राघवानन्दकारिणीम् ॥२॥

भूमेर्दुहितरं विद्यां नमामि प्रकृतिं शिवाम् ।
पौलस्त्यैश्वर्यसंहत्रीं भक्ताभीष्टां सरस्वतीम् ॥३॥

पतिव्रताधुरीणां त्वां नमामि जनकात्मजाम् ।
अनुग्रहपरामृद्धिमनघां हरिवल्लभाम् ॥४॥

आत्मविद्यां त्रयीरूपामुमारूपां नमाम्यहम् ।
प्रसादाभिमुखीं लक्ष्मीं क्षीराब्धितनयां शुभाम् ॥५॥

नमामि चन्द्रभगिनीं सीतां सर्वाङ्गसुन्दरीम् ।
नमामि धर्मनिलयां करुणां वेदमातरम् ॥६॥

पद्मालयां पद्महस्तां विष्णुवक्षःस्थलालयाम् ।
नमामि चन्द्रनिलयां सीतां चन्द्रनिभाननाम् ॥७॥

आह्लादरूपिणीं सिद्धिं शिवां शिवकरीं सतीम् ।
नमामि विश्वजननीं रामचन्द्रेष्टवल्लभाम् ।
सीतां सर्वानवद्याङ्गीं भजामि सततं हृदा ॥८॥

≪ • ◦ ❈ ◦ • ≫

# Janaki Sotra

jaanakee tvaam namasyaami sarvapaapranaashinim
jaanakee tvaam namasyaami sarvapaapranaashineem ll1ll

daaridryaaranasanhrtim bhaktaanaabhishtadaayineem ll
videharaaja tanayaam raaghavaanandakaarineem ll2ll

bhoomerduhitaram vidyaam namaami prakrtim shivam ll
paulastya ishvarya sanhatrim bhaktaabheeshtaam sarasvateem ll3ll

pativrataadhoorinaam tvaam namaami janaatmajam ll
anugrahaparamrddhimanagham harivallabham ll4ll

aatmavidyaam trayeeroopamumaaroopaam namaamyaham ll
prasaadaabhimukheem lakshmeem ksheerabadhitaanyaam shubhaam ll5ll

namaami chandrabhagineem seetaam sarvaangasundareem ll
namaami dharmanilayaam karunaam vedamaataram ll6ll

padmaalyam padmahastaam vishnuvakshahsthalaalayam ll
namaami chandranilayaam seetaam chandranibhannaam 7ll

ahlaadaroopineem siddhim shivam shivakaareem satim ll
namaami vishvajananeem raamachandreshtavallabham ll
seetaam sarvaanavaadyaangeem bhajaami satatam hrday ll8ll

✧ₓ┈┈°*❋ ❋*°┈┈ₓ✧